# Kanvanamoshadhisuktam

# કાણ્વાનામોષધિસૂક્તમ્

## Document Information

Text title : Oshadhi Sukta by Kanva

File name : kANvAnAmoShadhisUktam.itx

Category : veda, svara, sUkta

Location : doc_veda

Transliterated by : Mandar Kulkarni

Proofread by : Mandar Kulkarni

Latest update : March 3, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2025

*sanskritdocuments.org*

# કાણ્વાનામોષધિસૂક્તમ્

કાણ્વસંહિતાયાં ત્રયોદશેઽધ્યાયે ષષ્ઠોઽનુવાકઃ ।
આ ષટ્સપ્તત્યા ઋચ આ શતતમામ્(૭૬-૧૦૦) પઞ્ચવિંશત્યૃચઃ ।
બહુલં બાહૃચ્યપાઠાનુસારી । ક્વચિત્ક્વચિદલ્પતરઃ પાઠભેદઃ ।
અધિકે ચ દ્વે ઋચૌ । તથાહિ મન્ત્રક્રમઃ -
હરિઃ ઓ૩મ્ ॥

## સસ્વરઃ

યા ઓષધીઃ પૂર્વા જાતા દેવેભ્યસ્ત્રિયુગં પુરા ।
મનૈ નુ બભ્રુણામહં શતં ધામાનિ સપ્ત ચ ॥ ૧॥

શતં વો અમ્બ ધામાનિ સહસ્રમુત વો રુહઃ ।
અધા શતક્રત્વો યૂયમિમં મે અગદં કૃતા ॥ ૨॥

ઓષધીઃ પ્રતિ ગૃભ્ણીત પુષ્પવતીઃ પ્રસૂવરીઃ ।
અશ્વા ઇવ સજિત્વરીર્વીરુધઃ પારયિષ્ણવઃ ॥ ૩॥

ઓષધીરિતિ માતરસ્તદ્વો દેવીરુપબ્રુવે ।
સનેયમશ્વં ગાં વાસ આત્માનં તવ પૂરુષ ॥ ૪॥

અશ્વત્થે વો નિષદનં પર્ણે વો વસતિષ્કૃતા ।
ગોભાજ ઇત્કિલાસથ યત્સનવથ પૂરુષમ્ ॥ ૫॥

યત્રૌષધીઃ સમગ્મત રાજાનઃ સમિતા ઇવ ।
વિપ્રઃ સ ઉચ્યતે ભિષગ્ રક્ષોહામીવચાતનઃ ॥ ૬॥

અશ્વાવતીં સોમાવતીમૂર્જયન્તીમુદોજસમ્ ।
આવિત્સિ સર્વા ઓષધીરસ્મા અરિષ્ટતાતયે ॥ ૭॥

ઉચ્છુષ્મા ઓષધીનાં ગાવો ગોષ્ઠાદિવેરતે ।
ધનં સનિષ્યન્તીનામાત્માનં તવ પૂરુષ ॥ ૮॥
ઇષ્કૃતિર્નામ વો માતાથો યૂયં સ્થ નિષ્કૃતીઃ ।
સીરાઃ પતત્રિણી સ્થન યદામયતિ નિષ્કૃથ ॥ ૯॥
અતિ વિશ્વાઃ પરિષ્ઠા સ્તેન ઇવ વ્રજમક્રમુઃ ।
ઓષધીઃ પ્રાચુચ્યવુર્યત્ કિં ચ તન્વો રપઃ ॥ ૧૦॥
યદિમા વાજયન્નહમોષધીર્હસ્ત આદધે ।
આત્મા યક્ષ્મસ્ય નશ્યતિ પુરા જીવગૃભો યથા ॥ ૧૧॥
યસ્યૌષધીઃ પ્રસર્પ્થાઙ્ગમઙ્ગં પરુષ્પરુઃ ।
તતો યક્ષ્મં વિબાધધ્વ ઉગ્રો મદ્ધ્યમશીરિવ ॥ ૧૨॥
સાકં યક્ષ્મ પ્રપત ચાષેણ કિકિદીવિના ।
સાકં વાતસ્ય ધ્રાજ્યા સાકં નશ્ય નિહાકયા ॥ ૧૩॥
અન્યા વો અન્યામવત્વન્યાન્યસ્યા ઉપાવતા ।
તાઃ સર્વાઃ સંવિદાના ઇદં મે પ્રાવતા વચઃ ॥ ૧૪॥
યાઃ ફલિનીર્યા અફલા અપુષ્પા યાશ્ચ પુષ્પિણીઃ ।
બૃહસ્પતિપ્રસૂતાસ્તા નો મુઞ્ચન્ત્વં હસઃ ॥ ૧૫॥
મુઞ્ચન્તુ મા શપથ્યાદથો વરુણ્યાદુત ।
અથો યમસ્ય પડ્વીશાત્ સર્વસ્માદ્ દેવકિલ્બિષાત્ ॥ ૧૬॥
અવયતીઃ સમવદન્ત દિવ ઓષધયસ્પરિ ।
યં જીવમશ્નવામહૈ ન સ રિષ્યાતિ પૂરુષઃ ॥ ૧૭॥
યા ઓષધીઃ સોમરાજ્ઞીર્બહ્વીઃ શતવિચક્ષણાઃ ।
તાસામસિ ત્વમુત્તમારં કામાય શં હૃદે ॥ ૧૮॥
યા ઓષધીઃ સોમરાજ્ઞીર્વિષ્ઠિતાઃ પૃથિવીમનુ ।
બૃહસ્પતિપ્રસૂતા અસ્યૈ સન્દત્ત વીર્ય્યમ્ ॥ ૧૯॥
યાશ્ચેદમુપશૃણ્વન્તિ યાશ્ચ દૂરં પરાગતાઃ ।
સર્વાઃ સઙ્ગત્ય વીરુધોસ્યૈ સન્દત્ત વીર્ય્યમ્ ॥ ૨૦॥

નાશયિત્રી બલાસસ્યાર્શસ ઉપચિતામસિ ।
અથો શતસ્ય યક્ષ્માણાં પાકારોરસિ નાશની ॥ ૨૧॥

માવો રિષત્ ખનિતા યસ્મૈ ચાહં ખનામિ વઃ ।
દ્વિપચ્ચતુષ્પદસ્માકં સર્વમસ્ત્વનાતુરમ્ ॥ ૨૨॥

ઓષધયઃ સંવદન્તે સોમેન સહ રાજ્ઞા ।
યસ્મૈ કૃણોતિ બ્રાહ્મણસ્તં રાજન્ પારયામસિ ॥ ૨૩॥

ત્વાં ગન્ધર્વા અખનં સ્ત્વામિન્દ્રસ્ત્વાં બૃહસ્પતિઃ ।
ત્વામોષધે સોમો રાજા વિદ્વાન્ યક્ષ્માદમુચ્યત ॥ ૨૪॥

ત્વમુત્તમાસ્યોષધે તવ વૃક્ષા ઉપસ્તયઃ ।
ઉપસ્તિરસ્તુ સોઽસ્માકં યો અસ્માઁ૩ અભિદાસતિ ॥ ૨૫॥

ઇત્યાચાર્યગોવિન્દસ્ય કૃતિષુ કાણ્વીયસ્ય ઓષધિસૂક્તસ્ય ભાષ્યં સમ્પૂર્ણમ્ ॥

## સસ્વરઃ

યા ઓષધીઃ પૂર્વા જાતા દેવેભ્યસ્ત્રિયુગં પુરા ।
મનૈ નુ બભ્રુણામહં શતં ધામાનિ સપ્ત ચ ॥ ૧॥

શતં વો અમ્બ ધામાનિ સહસ્રમુત વો રુહઃ ।
અધા શતક્રત્વો યૂયમિમં મે અગદં કૃતા ॥ ૨॥

ઓષધીઃ પ્રતિ ગૃભ્ણીત પુષ્પવતીઃ પ્રસૂવરીઃ ।
અશ્વા ઇવ સજિત્વરીર્વીરુધઃ પારયિષ્ણવઃ ॥ ૩॥

ઓષધીરિતિ માતરસ્તદ્વો દેવીરુપબ્રુવે ।
સનેયમશ્વં ગાં વાસ આત્માનં તવ પૂરુષ ॥ ૪॥

અશ્વત્થે વો નિષદનં પર્ણે વો વસતિષ્કૃતા ।
ગોભાજ ઇત્કિલાસથ યત્સનવથ પૂરુષમ્ ॥ ૫॥

યત્રૌષધીઃ સમગ્મત રાજાનઃ સમિતા ઇવ ।
વિપ્રઃ સ ઉચ્યતે ભિષગ્ રક્ષોહામીવચાતનઃ ॥ ૬॥

અશ્વાવતીં સોમાવતીમૂર્જયન્તીમુદોજસમ્ ।

આવિત્સિ સર્વા ઓષધીરસ્મા અરિષ્ટતાતયે ॥ ૭॥

ઉચ્છુષ્મા ઓષધીનાં ગાવો ગોષ્ઠાદિવેરતે ।
ધનં સનિષ્યન્તીનામાત્માનં તવ પૂરુષ ॥ ૮॥

ઇષ્કૃતિર્નામ વો માતાથો યૂયં સ્થ નિષ્કૃતીઃ ।
સીરાઃ પતત્રિણી સ્થન યદામયતિ નિષ્કૃથ ॥ ૯॥

અતિ વિશ્વાઃ પરિષ્ઠા સ્તેન ઇવ વ્રજમક્રમુઃ ।
ઓષધીઃ પ્રાચુચ્યવુર્યત્ કિં ચ તન્વો રપઃ ॥ ૧૦॥

યદિમા વાજયન્નહમોષધીર્હસ્ત આદધે ।
આત્મા યક્ષ્મસ્ય નશ્યતિ પુરા જીવગૃભો યથા ॥ ૧૧॥

યસ્યૌષધીઃ પ્રસર્પથાઙ્ગમઙ્ગં પરુષ્પરુઃ ।
તતો યક્ષ્મં વિબાધધ્વ ઉગ્રો મદ્ધ્યમશીરિવ ॥ ૧૨॥

સાકં યક્ષ્મ પ્રપત ચાષેણ કિકિદીવિના ।
સાકં વાતસ્ય ધ્રાજ્યા સાકં નશ્ય નિહાકયા ॥ ૧૩॥

અન્યા વો અન્યામવત્વન્યાન્યસ્યા ઉપાવતા ।
તાઃ સર્વાઃ સંવિદાના ઇદં મે પ્રાવતા વચઃ ॥ ૧૪॥

યાઃ ફલિનીર્યા અફલા અપુષ્પા યાશ્ચ પુષ્પિણીઃ ।
બૃહસ્પતિપ્રસૂતાસ્તા નો મુઞ્ચન્ત્વં હસઃ ॥ ૧૫॥

મુઞ્ચન્તુ મા શપથ્યાદથો વરુણ્યાદુત ।
અથો યમસ્ય પડ્બીશાત્ સર્વસ્માદ્ દેવકિલ્બિષાત્ ॥ ૧૬॥

અવયતીઃ સમવદન્ત દિવ ઓષધયસ્પરિ ।
યં જીવમશ્નવામહૈ ન સ રિષ્યાતિ પૂરુષઃ ॥ ૧૭॥

યા ઓષધીઃ સોમરાજ્ઞીર્બહ્વીઃ શતવિચક્ષણાઃ ।
તાસામસિ ત્વમુત્તમારં કામાય શં હૃદે ॥ ૧૮॥

યા ઓષધીઃ સોમરાજ્ઞીર્વિષ્ઠિતાઃ પૃથિવીમનુ ।
બૃહસ્પતિપ્રસૂતા અસ્યૈ સન્દત્ત વીર્ય્યમ્ ॥ ૧૯॥

યાશ્ચેદમુપશ‍ૃણ્વન્તિ યાશ્ચ દૂરં પરાગતાઃ ।
સર્વાઃ સઙ્ગત્ય વીરુધોસ્યૈ સન્દત્ત વીર્ય્યમ્ ॥ ૨૦॥

નાશયિત્રી બલાસસ્યાર્શસ ઉપચિતામસિ ।
અથો શતસ્ય યક્ષ્માણાં પાકારોરસિ નાશની ॥ ૨૧॥

માવો રિષત્ ખનિતા યસ્મૈ ચાહં ખનામિ વઃ ।
દ્વિપચ્ચતુષ્પદસ્માકં સર્વમસ્ત્વનાતુરમ્ ॥ ૨૨॥

ઓષધયઃ સંવદન્તે સોમેન સહ રાજ્ઞા ।
યસ્મૈ કૃણોતિ બ્રાહ્મણસ્તં રાજન્ પારયામસિ ॥ ૨૩॥

ત્વાં ગન્ધર્વા અખનં સ્ત્વામિન્દ્રસ્ત્વાં બૃહસ્પતિઃ ।
ત્વામોષધે સોમો રાજા વિદ્વાન્ યક્ષ્માદમુચ્યત ॥ ૨૪॥

ત્વમુત્તમાસ્યોષધે તવ વૃક્ષા ઉપસ્તયઃ ।
ઉપસ્તિરસ્તુ સોઽસ્માકં યો અસ્માઁઉ અભિદાસતિ ॥ ૨૫॥

ઇત્યાચાર્યગોવિન્દસ્ય કૃતિષુ કાણ્વીયસ્ય ઓષધિસૂક્તસ્ય ભાષ્યં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Mandar Kulkarni

*Kanvanamoshadhisuktam*

pdf was typeset on June 1, 2025

Please send corrections to *sanskrit@cheerful.com*